तपस् ---                                    Korada Subrahmanyam 5Oct2021

Of late , a peculiar जाति of academicians has emerged -- they did not learn the fundamentals of Sanskrit language nor studied any काव्यम् / शास्त्रम् etc under any
गुरु / आचार्य but bold enough to lecture on / comment on / interpret / translate any work , like रामायणम् / महाभारतम् I Earlier too there were such people but much less in number .
If they do not know the वृत्ति / meaning of terms like रामायणम् / भारतम् / तपस् / स्वाध्याय etc , I fail to understand as to , how can they discuss related issues ?
And their minds are filled with जिगीषा rather than जिज्ञासा !

Just like the term गुण has got different meanings in different systems / schools of Indian philosophy -- व्याकरणम् / न्यायवैशेषिके / सांख्यम् / अर्थशास्त्रम् / आयुर्वेदः / मीमांसा
and so on , तपस् also has got different denotations - but most of them can be taken as shades of meaning .
तपस् is wrongly translated as ' penance ' - if we go for back translation it will be ' प्रायश्चित्तम् ' and not तपस् ( just like धर्म - religion - मतम् I So , the term तपस् is at once
loaded / pregnant with meaning and as such it should be adapted rather than rendered .
तप = सन्तापे - भ्वादिः ( तप=दाहे , चुरादिः - तापयति / तपति ) -- तपति - ' सर्वधातुभ्यो'सुन् (उणादिः ,4-189 ) - तपस् - तपसी - तपांसि ।
( तपः = ग्रीष्मर्तुः - ' उष्ण ऊष्मागमस्तपः' - अमरः - पचाद्यच् । ' तपेन वर्षाः ' - माघः , 1-66 . तपाः सान्तः - माघमासः - ' तपा माघे ' - अमरः -असुन् - तपन्त्यस्मिन् । तपस्यः = फाल्गुनः - ' स्यात्तपस्यः फाल्गुनिकः '- अमरः - तपसि साधुः - ' तत्र साधुः ' पा 4-4-98 यत् ) । तपस्वी - तपः अस्य अस्तीति ' अस्मायामेधास्रजो विनिः ' पा 5-2-121 मतुबर्थे विनिः ।

ऋग्वेदः (10-154-2) -- तपसा ये अनाधृष्याः तपसा ये स्वर्ययुः । तपो ये चक्रिरे महस्ताश्चिदेवापि गच्छतात् ॥
यजुर्वेदः - तैत्तिरीयारण्यकम् (2-14 , स्वाध्यायब्राह्मणम्) -- ' तपो हि स्वाध्यायः ' ।
तैत्तिरीयोपनिषत् - शीक्षावल्ली -- 1. ' तपश्च स्वाध्यायप्रवचने च ' - तपः कृच्छ्रादिः ( शाङ्करभाष्यम्) -- ' तपः कृच्छ्रादिकर्म च ' - अमरः । ' तपो लोकान्तरे'पि च । चान्द्रायणादौ घने च पुमान् शिशिरमाघयोः '- मेदिनी ।

2.’तद्धि तपस्तद्धि तपः’ - ’स्वाध्यायाधीनं ह्यर्थग्रहणम् । अर्थज्ञानधीनं च परं श्रेयः । प्रवचनं च तदविस्मरणार्थं धर्मवृद्ध्यर्थं च । ... यस्मात् स्वाध्यायप्रवचने एव तपः , तस्मात् ते एवानुष्ठेये इति ’ - (शां भा) ।
भृगुवल्ली -- स तपो’तप्यत --- ’ तपोवोशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात् ; सर्वेषां हि नियतसाध्यविषयाणां सधनानां तप एव साधकतमं साधनमिति हि प्रसिद्धं लोके ।... तच्च तपः बाह्यान्तः-
करणसमाधानम् , तद्द्वारकत्वात् ब्रह्मप्रतिपत्तेः , ’ मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ’ इति स्मृतेः ॥
छान्दोग्योपनिषत् (5-10-1) -- ’ तद्य इत्थं विदुः । ये चेमे’रण्ये श्रद्धा तप इत्युपासते ....’।
मुण्डकोपनिषत् (1-2-11) -- ' तपः श्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः । सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ’ ॥ ...
वानप्रस्थाः संन्यासिनश्च ,
तपःश्रद्धे हि तपः स्वाश्रमविहितं कर्म श्रद्धा हिरण्यगर्भादिविषया विद्या ...।
गौतमस्मृतिः (19-15) -- ’ ब्रह्मचर्यं सत्यवचनं सवनेषूदकस्पर्शनम् आर्द्रवस्त्रस्ता अधःशायिता अनाशक इति  तपांसि ’ ।
मनुस्मृतिः (11--234-244) -- तपोमूलमिदं सर्वं दैवमानुषकं सुखम् । तपोमध्यं बुधैः प्रोक्तं तपो’न्तं वेददर्शिभिः ॥ ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् । वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम्॥
योगानुशासनम् (2-1 , 2-32 ) --- 'तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ’ ।
’शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः’ । ’ तपो द्वन्द्वसहनम् ।द्वन्द्वं च जिघत्सापिपासे शीतोष्णे
स्थानासने काष्ठमौनाकारमौने च ’ - व्यासभाष्यम् ।
विष्णुपुराणम् (6-7-37 ) -- स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् । कुर्वीत ब्रह्मणि तथा परस्मिन् प्रणवं मनः ॥